अनुक्रमाङ्क ..............................

कूट सं. : 820153-$SA_1$ (M)

कक्षा - अष्टमी

कृपया जाँच कर लें कि इस प्रश्न-पत्र में कुल 20 प्रश्न हैं और कुल 12 मुद्रित पृष्ठ हैं।

# संस्कृतम्

(सङ्कलनात्मकं मूल्याङ्कनम् - I)

निर्धारिताअवधिः - होरात्रयम् पूर्णाङ्काः - 90

निर्देशाः -

1. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
2. प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।
3. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् क्रमे एव लेखनीयानि।
4. प्रश्नपत्रे उत्तराणि न लेखनीयानि।
5. प्रश्नसङ्ख्या प्रश्नपत्रानुसारं लेखनीया।
6. खण्डसङ्ख्या अपि लेखनीया।

**खण्डः-'क' (अपठित-अवबोधनम्) (10)**

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत -

अधुना समाजे नैतिकमूल्यानाम् अभावः वर्तते। नैतिकमूल्यानां नाशकारणात् समाजे अनेके विकाराः उत्पन्नाः अभवन्। बालकाः, युवकाः सर्वे एव एतेन व्याधिना पीडिताः दृश्यन्ते। परं बालकाः अत्यधिकाः एतेन व्याधिना ग्रस्ताः सन्ति। ते गुरुणां मातापितृणां च सम्मानं तादृशं न कुर्वन्ति यादृशं पुरा सर्वे कुर्वन्ति स्म। प्रेमभावनायाः त्यागशीलतायाः च अपि ह्रासः अभवत्। सर्वे स्वजीवने व्यस्ताः सन्ति। अस्मिन् विषये गहनचिन्तनस्य कार्यस्य च आवश्यकता वर्तते तदैव वयं पुनः मिलित्वा प्रसन्नाः भवितुं शक्नुमः। मूल्यरक्षणाय भारतीयसंस्कृतेः संस्कृतस्य च पुनरूद्धारः अति आवश्यकः अतः वयं मिलित्वा वदेम- "जयतु संस्कृतं जयतु भारतम्"।

(I) एकपदेन उत्तरत - 1×2=2

(i) समाजे केषाम् अभावः वर्तते?

(ii) किमर्थं भारतीयसंस्कृतेः संस्कृतस्य च पुनरुद्धारः आवश्यकः अस्ति?

(II) पूर्णवाक्येन उत्तरत - 2×2=4

(i) बालकाः किम् न कुर्वन्ति?

(ii) वयं किम् वदेम?

(III) निर्देशानुसारम् उत्तरत - ½×4=2

(क) 'विकारा:' इति पदस्य विशेषणपदं किम् अस्ति?

(i) अनेका: (ii) अनेकम्

(iii) अनेके (iv) अनेकस्य

(ख) 'बालका:' इति कर्तृपदस्य क्रियापदं लिखत -

(i) सन्ति (ii) वर्तते

(iii) अस्ति (iv) जयतु

(ग) 'पुरा सर्वे कुर्वन्ति स्म' अस्मिन् वाक्ये अव्ययपदं चित्वा लिखत -

(i) सर्वे (ii) कुर्वन्ति

(iii) पुरा (iv) स्म

(घ) 'अनावश्यकम्' इति पदस्य विलोमपदं गद्यांशात् चित्वा लिखत -

(i) आवश्यकस्य (ii) आवश्यकम्

(iii) आवश्यक: (iv) आवश्यकी

(IV) अस्य अनुच्छेदस्य कृते उचितं शीर्षकं लिखत। 2

## खण्ड:-'ख' (रचनात्मक-कार्यम्) (10)

2. अद्य: प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत- 1×5=5



मञ्जूषा

| |
|---|
| उपविशति, चटका, मृग:, अस्ति, उपविशति, बाला:, शशक:, अस्ति, आकर्णयन्ति, वचनानि, ध्यानेन, वृक्षस्य, अध: |

3. स्वमित्रं प्रति लिखिते पत्रे मञ्जूषातः रिक्तस्थानानि पूरयित्वा पत्रं पुनः लिखत – ½×10=5

छात्रावासतः

(i) ..........................

प्रिय मित्र राम,

(ii) .......................... नमस्ते

अत्र कुशलं तत्रास्तु। (iii) .......................... अहं मित्रैः सह जन्तुशालां द्रष्टुं दिल्लीनगरम् अगच्छम्। तत्र वयम् अनेकान् (iv) .......................... अपश्याम। सिंहाः उच्चैः (v) ..........................। (vi) .......................... नृत्यन्ति स्म। अनेकवर्णानां चटकाः अपि (vii) ..........................। तत्र हरीतिमा अत्यधिका वर्तते स्म। वृक्षाः पादपाः (viii) .......................... च जन्तुशालायाः सौन्दर्यं वर्धयन्ति स्म। त्वम् अपि अत्र (ix) ..........................। वयं मिलित्वा पुनः तत्र गमिष्यामः। सर्वेभ्यः मम नमस्कारः कथनीयः।

भवदीयम् (x) ..........................

श्यामः

मञ्जूषा –

| |
|---|
| आगच्छ, मयूराः, पशून्, सस्नेहम्, कुरुक्षेत्रम्, गर्जन्ति, ह्यः, आसन्, पुष्पाणि, मित्रम् |

**खण्डः–'ग' ( अनुप्रयुक्त–व्याकरणम् ) ( 35 )**

4. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत – 1×3=3

(i) मम संस्कृतस्य परीक्षा शोभना अभवत्।

(ii) रजनी + ईशः शीतलतां यच्छति।

(iii) वनोत्सवे मम विद्यालये छात्राः पादपान् आरोपयन्ति।

5. (अ) विकल्पेभ्यः उचितं शब्दरूपं चित्वा वाक्येषु रिक्तस्थानानि पूरयत - ½×6=3

(क) गुरुः ..................... उपहारं यच्छति।

(i) रामाय (ii) रामः

(iii) रामात् (iv) रामस्य

(ख) आम्रम् ..................... राजा अस्ति।

(i) फलम् (ii) फलानि

(iii) फलानाम् (iv) फलात्

(ग) मम भगिन्याः नाम ..................... अस्ति।

(i) लता (ii) लतया

(iii) लताम् (iv) लतानाम्

(घ) ..................... गंगा श्रेष्ठा।

(i) नदी (ii) नदीषु

(iii) नदीम् (iv) नदीः

(ङ) ..................... कुत्र निवसति?

(i) भवतः (ii) भवान्

(iii) भवता (iv) भवताम्

(च) कृष्णा ..................... छात्रं पश्यति।

(i) गच्छन्ती (ii) गच्छन्

(iii) गच्छन्तम् (iv) गच्छता

(आ) उचितं सर्वनामपदं चित्वा रिक्तस्थानानि पूरयत - 1×3=3

(क) ..................... नित्यं पठनस्य अभ्यासं करोमि।

(i) मम (ii) मया

(iii) अहम् (iv) अस्माभिः

(ख) ...................... नाम किम्?

(i) तव (ii) तस्मिन्

(iii) तस्य (iv) त्वया

(ग) इदं पुस्तकं ...................... अस्ति?

(i) कः (ii) कस्मात्

(iii) किम् (iv) कस्याः

6. (अ) कोष्ठके प्रदत्तसंङ्ख्यां संस्कृतपदेन रिक्तस्थानयोः लिखत – 1×2=2

(क) तस्मिन् कक्षे ............................... जमाः तिष्ठन्ति। (32)

(ख) ............................... प्रहराः भवन्ति। (8)

(आ) उचितं संङ्ख्यावाचकं पदं विकल्पेभ्यः चित्वा लिखत – ½×2=1

(क) ............................... चन्द्रः तमः हन्ति।

(i) एकम् (ii) एकेन

(iii) एकः (iv) एकस्य

(ख) ............................... छात्रे ध्यानेन पठतः।

(i) द्वे (ii) द्वौ

(iii) द्वाभ्याम् (iv) द्वयोः

7. मञ्जूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयत – (1×3=3)

(i) ................................. कलहेन।

(ii) छात्राः कक्षायाः ................................. न गच्छेयुः।

(iii) अहम् ................................. नित्यं पठामि।

**मञ्जूषा** – | बहिः, अपि, अलम् |

8. रेखाङ्कितपदेषु उपसर्गं पृथक् कृत्वा योजयित्वा वा लिखत – 1×3=3

(i) सीता रामम् अनुगच्छति।

(ii) सज्जनाः सर्वान् उपकुर्वन्ति।

(iii) शिशुः मातुः संकेतान् अव+गच्छति।

9. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत – 1×5=5

(i) मम गृहम् अभित वृक्षाः सन्ति।

(ii) अलम् अतिवदनेन।

(iii) मम मित्रम् कर्णाभ्याम् बधिरः अस्ति।

(iv) अध्यापकः छात्रं प्रति गच्छति।

(v) बालः पित्रा सह भ्रमितुं अगच्छत्।

10. अधोलिखितेषु समस्तपदेषु समासस्य नामानि लिखत – 1×3=3

(i) कर्णार्जुनौ (ii) देशसेवा (iii) वृक्षपतितः

11. विकल्पेभ्यः उचितं धातुरुपं चित्वा वाक्येषु रिक्तस्थानानि पूरयत – 1×5=5

(क) सर्वे जनाः मिलित्वा प्रार्थनां कर्तुं देवालयं .....................।

(i) गच्छतः (ii) गच्छथ

(iii) गच्छन्ति (iv) गच्छामः

(ख) छात्राः नित्यं पाठम् .....................।

(i) पठेत् (ii) पठेतम्

(iii) पठेयुः (iv) पठेः

(ग) श्वः मोहनस्य विवाहः .....................।

(i) भविष्यति　　(ii) भविष्यसि

(iii) भविष्यामि　　(iv) भविष्यामः

(घ) ह्यः वयम् एकां नाटिकाम् .....................।

(i) अपश्यत्　　(ii) अपश्याम

(iii) अपश्यः　　(iv) अपश्यताम्

(ङ) यूयम् पाठम् .....................।

(i) स्मर　　(ii) स्मरतु

(iii) स्मरत　　(iv) स्मराणि

12. अधोलिखितेषु वाक्येषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत – 1×4=4

(i) <u>पठन्</u> शिशुः हसति अपि।

(ii) त्वम् अत्र <u>आ+गम्+ल्यप्</u> तिष्ठ।

(iii) सुछात्रः <u>पठित्वा</u> एव खेलति।

(iv) बालाः <u>खेल्+क्त्वा</u> प्रसन्नाः भवन्ति।

**खण्डः-'घ' ( पठित-अवबोधनम् ) ( 35 )**

13. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 5

महात्मा विठोवा एकस्मात् नगरात् बहिः कुटीरं निर्माय वसति स्म। अनेके भक्ताः तस्य दर्शनाय आगत्य तं स्वगृहम् आगन्तुम् आमन्त्रयन्ति स्म। एकदा एकः दर्शनार्थी नागरिकः रात्रिभोजाय तं महात्मानं प्रार्थयत्। महात्मा विठोवा तस्य निवेदनं स्वीकृतवान्। सः यदा भोजनाय तस्य जनस्य गृहम् अगच्छत्। सः कपाटम् आवृत्य कुत्रचित् गतः आसीत्। महात्मा विठोवा भोजनं विना एव कुटीरं प्रत्यागच्छत्। रात्रौ च बुभुक्षितः एव अतिष्ठत्।

(I) एकपदेन उत्तरत - ½×2=1

(क) कः निमन्त्रणं स्वीकृतवान्?

(ख) नागरिकः किमर्थम् महात्मानं प्रार्थयत्?

(ii) पूर्णवाक्येन उत्तरत - 1×2=2

(क) महात्मा विठोवा कुत्र वसति स्म?

(ख) कः भोजनं विना एव कुटीरं प्रत्यागच्छत्?

(iii) निर्देशानुसारम् उत्तरत - 1×2=2

(क) 'दर्शनार्थी' इति विशेषणपदस्य विशेष्यपदं किम्?

(i) महात्मा (ii) कुटीरम्

(iii) नागरिकः (iv) विठोवा

(ख) 'दिवसे' पदस्य विलोमपदं गद्यांशात् चित्वा लिखत।

(i) रात्रौ (ii) गृहम्

(iii) आवृत्य (iv) बहिः

14. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

गर्जति शरदि न वर्षति वर्षासु निः स्वनो मेघः।

नीचो वदति न कुरुते न वदति सुजनः करोत्येव।।

(I) एकपदेन उत्तरत - ½×2=1

(क) वर्षासु कः वर्षति?

(ख) मेघः कदा न वर्षति?

(ii) पूर्णवाक्येन उत्तरत - 1×2=2

(क) कः केवलं वदति परन्तु न करोति?

(ख) कीदृशः मेघः वर्षति?

(iii) निर्देशानुसारम् उत्तरत – 1×2=2

(क) 'वदति' क्रियापदस्य कर्तृपदं किम्?

(i) नीचः (ii) वर्षासु

(iii) मेघः (iv) न

(ख) 'नीचः वदति एव' अस्मिन् वाक्ये अव्ययपदं किम्?

(i) एव (ii) नीचः

(iii) वदति (iv) मेघः

15. अधोलिखितं संवादं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 5

प्रणवः – संस्कृतम् इति पदस्य कः अर्थः?

विश्वासः – 'शुद्धम्', 'परिष्कृतम्' इति संस्कृतपदस्य अर्थः अस्ति।

सुमेधा – संस्कृतभाषायाः कति रुपाणि सन्ति।

प्रबुद्धः – संस्कृतभाषायाः द्वे रूपे स्तः। एकं वैदिकं संस्कृतं द्वितींय च लौकिकं संस्कृतम्।

प्रणवः – वैदिकसंस्कृतस्य किं प्रमुखं साहित्यम् अस्ति।

प्रबुद्धः – चत्वारः वेदाः, ब्राह्मणग्रन्थाः, आरण्यक-ग्रन्थाः उपनिषदः च वैदिकं साहित्यं कथ्यते।

सुमेधा – लौकिकसंस्कृतस्य आरम्भः कदा अभवत्?

विवेक – बाल्मीकेः कालात् लौकिकसंस्कृतस्य प्रारम्भः मन्यते। अस्य कृतिः 'रामायणं' लौकिकसंस्कृतस्य आदिमः ग्रन्थः अस्ति।

(I) एकपदेन उत्तरत – ½×2=1

(क) कस्याः द्वे रुपे स्तः?

(ख) वेदाः कति सन्ति?

(ii) पूर्णवाक्येन उत्तरत - 1×2=2

(क) वैदिकसंस्कृतस्य किं प्रमुखं साहित्यम् अस्ति?

(ख) संस्कृतम् इति पदस्य कः अर्थः?

(iii) निर्देशानुसारम् उत्तरत - 1×2=2

(क) 'प्रमुखं' विशेषणपदस्य विशेष्यपदं लिखत -

(i) ग्रन्थः (ii) कालात्

(iii) च (iv) साहित्यम्

(ख) 'लौकिकसंस्कृतस्य आरम्भः कदा अभवत्' अस्मिन् वाक्ये अव्ययपदं किम्?

(i) आरम्भः (ii) कदा

(iii) लौकिकसंस्कृतस्य (iv) अभवत्।

16. मञ्जूषायां प्रदत्तैः पदैः रिक्तस्थानानि पूरयित्वा भावार्थं लिखत - 1×4=4

(अ) विद्या ददाति विनयम्।

भावार्थः - विद्या अर्थात् ज्ञानं ..................... विनम्रतां यच्छति। जनाः ..................... नम्रतां प्राप्नुवन्ति। अतः विद्यां प्राप्य अभिमानं मा कुरुत।

(आ) सत्यमेव जयते न अनृतम्।

भावार्थः - संसारे ..................... एव जयः भवति न तु असत्यस्य। अतः ..................... सत्यम् वदन्तु।

मञ्जूषा - | सत्यस्य, मनुष्याय, सर्वदा, विद्यया |

17. अधोलिखितौ श्लोकौ पठित्वा उचितपदैः अन्वयं पूरयत - ½×8=4

(अ) यः पठति लिखति पश्यति परिपृच्छति पण्डितान् उपाश्रयति।

तस्य दिवाकरकिरणैः नलिनीदलमिव विकास्यते बुद्धिः।।

अन्वयः - यः ...................... लिखति पश्यति परिपृच्छति ......................

उपाश्रयति। तस्य ..................... दिवाकरकिरणैः ..................... इव विकास्यते।

(आ) जाड्यं धियो हरति सिञ्चति वाचि सत्यं

मानोन्नतिं दिशति पापम् अपाकरोति।

चेतः प्रसादयति दिक्षु तनोति कीर्तिं

सत्सङ्गतिः कथय किं न करोति पुंसाम्।।

अन्वयः - सत्सङ्गतिः धियः ...................... हरति। वाचि ......................

सिञ्चति। मानोन्नतिं दिशति, ...................... अपाकरोति, चेतः प्रसादयति, दिक्षु

..................... तनोति, कथय सत्सङ्गतिः पुसां किं न करोति?

18. अधोलिखितानि वाक्यानि कथाक्रमानुसारं लिखत - 1×5=5

(क) वर्षाकाले काकस्य गृहं नष्टम् अभवत्।

(ख) काकः चटका च मित्रे स्तः।

(ग) ग्रीष्मकाले चटकायाः गृहं नष्टम् अभवत् सा शरणाय काकस्य गृहं गच्छति।

(घ) चटका सहर्षं तस्य स्वागतं करोति स्म।

(ङ) काकः तस्यै शरणं न अयच्छत्।

19. अधालिखितेषु वाक्येषु रेखाङ्कितपदानि आघृत्य प्रश्ननिर्माणं कुरुत - 1×5=5

(क) पुरुषः <u>चरणयोः</u> अपतत्।

(ख) <u>चटकायाः</u> गृहं नष्टं अभवत्।

(ग) <u>जलस्य</u> अभावात् कृषिः न भवति।

(घ) <u>छात्रैः</u> एका प्रश्नोत्तरी आयोजिता।

(ङ) महानगराणां विकासः नद्याः <u>तटेषु</u> भवति।

20. अधोलिखितानां पदानां उचितार्थैः सह मेलनं कुरुत - ½×4=2

| | |
|---|---|
| (i) लोचनम् | अनृतम् |
| (ii) चेतः | हृदयम् |
| (iii) बुद्धिः | नेत्रम् |
| (iv) असत्यम् | मतिः |